# अध्यापकस्य प्रभावि अध्यापनम्

देवेन्द्र कुमार शर्मा

अध्यापनं नाम अज्ञातविषयाणां विषयविशेषज्ञैः ज्ञानसम्पादनम् इति उच्यते। अनेन अध्यापनं नाम विषयाणां ज्ञानप्रापणप्रक्रिया इति जायते। प्राचीनकाले शिष्याः अज्ञातविषयाणां ज्ञानार्थं गुरुन् आश्रयन्ते स्म। तस्मिन् समये गुरुकेन्द्रितशिक्षा आसीत्। शिक्षाया-उपेश्यं च मोक्षप्राप्तिः आसीत्। परिदानीं ज्ञानप्राप्तिः न केवलम् अध्यापकेन, अपि च अन्यमाध्यमैः अपि भवितुमर्हति।

मनोविज्ञानमनुसृत्य शिक्षणं नाम अधिगमसम्पादनार्थं प्रयुक्तं शास्त्रम् इति उच्यते। शिक्षणं तादृशी प्रक्रिया भवति, यस्याः फलम् अधिगमः भवति। अतः अधिगमः एव शिक्षणस्य प्रधानमुद्देश्यं भवति। यत्र अधिगमः न भवति, तादृशशिक्षणं, शिक्षणपण्देन व्यवहर्तु न शक्यते। अधिगमश्च छात्राधारितं भवति। अतः छात्रकेन्द्रितशिक्षा अपेक्ष्यते।

इदानीन्तनशिक्षणव्यवस्थायां प्रत्येकमपि अंशः छात्रदृष्ट्या अवबोधनीयः। अपि च शिक्षया छात्रे समग्रव्यक्तित्वस्य विकासार्थ शिक्षकैः प्रयासः करणीयः, यतः छात्रस्य अधिगमेन सह सर्वाङ्गीणविकास एव इदानीन्तनशिक्षायाः उद्देश्यं भवति। अतः शिक्षणेन सह छात्रे सर्वाङ्गीणविकाससम्पादनमपि शिक्षकस्य कर्तव्यम्। एतादृशकर्तव्यपालनार्थं शिक्षके केचन विशिष्टगुणाः अपेक्ष्यन्ते।

अस्माकं देशे गुरोः कृते विशिष्टं स्थानं वर्तते। प्राचीनभारतीयपरम्पणरायां गुरुः त्रिमूर्त्तिस्वरुपः भवति। मतापित्रोः अनन्तरं तृतीयं महत्त्वपूर्णं स्थनं गुरोः एव भवति। गुरुः सन्मित्रं, श्रेष्ठः दार्शनिकः, सुमार्गदर्शकश्च भवति। गुरोः लक्षणमिदम् इदानीन्तन अध्यापकेष्वपि अन्वेति। इदानीन्तनसमाजे शिक्षकाः एव उत्तमनागरिकनिर्मातारः, देशप्रगतेः निर्देशकाश्च भवन्ति। तेषां प्रभाव्यध्यापनेन न केवलं छात्राः, समाजोऽपि प्रभावितः भवति। अतः देशस्य प्रगतिः अध्यापकानां हस्ते एव भवति।

उत्तमशिक्षणाय उत्तमाध्यापकाः अपेक्ष्यन्ते। यस्य शिक्षण-कौशलेषु नैपुण्यं, कौशलानां प्रयोगज्ञानं च भवति, यः आवश्यकता-मनुसृत्य दार्शनिकः सखा, मार्गदर्शकरुपेण विभिन्नपात्रपोषणं कर्तुं शक्नोति। यश्च कर्तव्यनिष्ठः भवति, स एव उत्तमशिक्षकः इति उच्यते।

सिंग्(1972) महोदयस्य मनमनुसृत्य प्रभाव्यध्यापकानां लक्षणानि यथा-

- छात्राणाम् अभिवृद्धिविकासविषयकं शास्त्रीयं ज्ञानम्।
- मनोविज्ञानशास्त्रपरिचयः।
- छात्राणां सर्वदा प्रोत्साहनम्।

* छात्रस्तरमनुसृत्य तेभ्यः कार्यक्रमाणाम् आयोजनम्।
* तेषां कार्यक्रमाणां सफलतया पूर्त्यर्थम् अभिप्रेरणम्।
* स्वीयवृत्तिं प्रति आसक्तिः अङ्कितभावना, पूज्यभावना च।
* छात्रेषु स्नेहभावना, क्षमा, सहनशीलता च।
* स्वीयशक्तिसामर्थ्यानां विषये सम्पूर्णम् अवगाहनञ्च।

**प्रभाव्यध्यापनस्य सूत्राणि–**

1. शिक्षणेदेश्यनिर्धारणम्।
2. क्रियाशीलाधिगमः।
3. अभिप्रेरणम्।
4. स्नेहभावना।
5. सहयोगः।
6. सर्जनात्मकशिक्षणम्।
7. शिक्ष्ज्ञणसूत्राणामनुसरणम्।
8. पाठ्यमानविषयाणां निजजीवनेन सम्बन्धः।
9. पाठ्यमानस्य पाठस्य योजनानिर्माणम्।
10. समस्यानां दोषानां च अभिज्ञानं, परिष्कारश्च।
11. छात्राणणं पूर्वानुभवानामाधारेण शिक्षणम्।

**प्रभाव्यध्यापनस्य सोपानानि–**

1. योजना–छात्रस्तरं, कक्ष्यां, विषयमनुसृत्य च पाठयोजनानिर्माणम्।
2. व्यवस्थापनम् – पाठ्योजनामनुसृत्य शिक्षणसूत्राणां, विधीनाम्, उपकरणानाञ्च व्यवस्थापानम्।
3. क्रियान्वयनम् – पाठयोजनामनुसृत्य पाठनम्।
4. नियन्त्रणम् (मूल्याङ्कनम्) – छात्रोपलब्धेः, उद्देश्यप्राप्तेः, स्वीयशिक्षणशैल्याः, शिक्षणविधीनाञ्च मूल्याङ्कनम्।

**प्रभाव्यध्यापने अवधेयाः अंशाः–**

1. मनोविज्ञानस्य ज्ञानम्- छात्राणां वयः मानसिकक्षमताश्च ज्ञात्वा तदनुसृत्य अध्यापनम्।
2. अनुसन्धानसामर्थ्यम् – छात्रसमस्याविषयकं, नूतनज्ञानविषयकञ्च अनुसन्धानसामर्थ्यं स्यात् शिक्षकस्य।
3. प्रजातान्त्रिकदृष्टिः – यावत् अनुचितं न भवति तावत् छात्रस्य स्वीयअभिप्रायकथने पूर्णस्वातन्त्र्यस्य दानम्।

4. विषयज्ञानम्- पाठ्यमायनविषये सैद्धान्तिकं, प्रायोगिकं, अनुप्रयोगात्मकं च ज्ञानम्।
5. पाठनविधिषु अधिकारः-उचितशिक्षणविधेः चयने नैपुण्यम्, तदर्थं शिक्षणविधिषु अधिकारः।
6. पाठनस्य पूर्वसत्राहः- पाठनात् प्रागेव उपयुक्तपाठयोजनायाः निर्माणम्ः तदनु उपकरणानां सज्जीकरणम्।
7. अध्ययने तत्परता- सर्वदा नूतनविषयाणां ज्ञाने तत्परता।
8. साम्प्रतिकसामाजिकविषयाणां ज्ञानम्- साम्प्रतिकसमाजे छात्राणाम् आवश्यकतानां ज्ञानम्०। विभिन्न सामाजिक परिस्थितीनां ज्ञानम्।
9. शिक्षकवृत्तौ आसक्तिः- सर्वदा छात्राणां विकाससम्पादने प्रयासः कर्तव्यपालनञ्च।

*प्राचार्य*
*श्री रामजीलाल स्मृति शिक्षा महाविद्यालय*
*पंवालिया, सांगानेर, जयपुर (राज.)*